## ॥ मन्त्रसिद्धिप्रद महादुर्गा अष्टोत्तर शतनाम स्तोत्रम् ॥

ॐ दुर्गा भवानी देवेशी विश्वनाथप्रिया शिवा ।
घोरदंष्ट्रा कराळास्या मुण्डमालाविभूषिता ॥
रुद्राणी तारिणी तारा माहेशी भववल्लभा ।
नारायणी जगद्धात्री महादेवप्रिया जया ॥
विजया च जयाराध्या शर्वाणी हरवल्लभा ।
असिता चाणिमादेवी लघिमा गरिमा तथा ॥
महेशशक्तिर्विश्वेशी गौरी पर्वतनन्दिनी ।
नित्या च निष्कलङ्का च निरीहा नित्यनूतना ॥
रक्ता रक्तमुखी वाणी वस्तुयुक्ता समप्रभा ।
यशोदा राधिका चण्डी द्रौपदी रुक्मिणी तथा ॥
गुहप्रिया गुहरता गुहवंशविलासिनी ।
गणेशजननी माता विश्वरूपा च जाह्नवी ॥
गङ्गा काली च काशी च भैरवी भुवनेश्वरी ।
निर्मला च सुगन्धा च देवकी देवपूजिता ॥
दक्षजा दक्षिणा दक्षा दक्षयज्ञविनाशिनी ।
सुशीला सुन्दरी सौम्या मातङ्गी कमलात्मिका ॥
निशुम्भनाशिनी शुम्भनाशिनी चण्डनाशिनी ।
धूम्रलोचनसंहर्त्री महिषासुरमर्दिनी ॥
उमा गौरी कराला च कामिनी विश्वमोहिनी ।

जगदीशप्रिया जन्मनाशिनी भवनाशिनी ॥
घोरवक्त्रा ललज्जिह्वा अट्टहासा दिगम्बरा ।
भारती स्वरगता देवी भोगदा मोक्षदायिनी ॥
इत्येवं शतनामानि कथितानि वरानने ।
नामस्मरणमात्रेण जीवन्मुक्तो न संशयः ।
पठित्वा शतनामानि मन्त्रसिद्धिं लभेत् धृवम् ॥

॥ इति शिवम् ॥

## ॥ mantrasiddhiprada mahādurgā aṣṭottara śatanāma stotram ॥

OM durgā bhavānī deveśī viśvanāthapriyā śivā ।
ghoradaṃṣṭrā karāldāsyā muṇḍamālāvibhūṣitā ॥
rudrāṇī tāriṇī tārā māheśī bhavavallabhā ।
nārāyaṇī jagaddhātrī mahādevapriyā jayā ॥
vijayā ca jayārādhyā śarvāṇī haravallabhā ।
asitā cāṇimādevī laghimā garimā tathā ॥
maheśaśaktirviśveśī gaurī parvatanandinī ।
nityā ca niṣkalaṅkā ca nirīhā nityanūtanā ॥
raktā raktamukhī vāṇī vastuyuktā samaprabhā ।
yaśodā rādhikā caṇḍī draupadī rukmiṇī tathā ॥
guhapriyā guharatā guhavaṃśavilāsinī ।
gaṇeśajananī mātā viśvarūpā ca jāhnavī ॥

gaṅgā kālī ca kāśī ca bhairavī bhuvaneśvarī |
nirmalā ca sugandhā ca devakī devapūjitā ||
dakṣajā dakṣiṇā dakṣā dakṣayajnavināśinī |
suśīlā sundarī saumyā mātaṅgī kamalātmikā ||
niśumbhanāśinī śumbhanāśinī caṇḍanāśinī |
dhūmralocanasaṃhartrī mahiṣāsuramardinī ||
umā gaurī karālā ca kāminī viśvamohinī |
jagadīśapriyā janmanāśinī bhavanāśinī ||
ghoravaktrā lalajjihvā aṭṭahāsā digambarā |
bhāratī svaragatā devī bhogadā mokṣadāyinī ||
ityevaṃ śatanāmāni kathitāni varānane |
nāmasmaraṇamātreṇa jīvanmukto na saṃśayaḥ |
paṭhitvā śatanāmāni mantrasiddhiṃ labhet dhṛvam ||

|| iti śivam ||

www.kamakotimandali.com